# शिक्षा–निदेशालयः राष्ट्रिय–राजधानी–क्षेत्रम्, देहली–सर्वकारः

## वार्षिक–अभ्यासप्रश्नपत्रम्– 2025-26

## कक्षा- षष्ठी संस्कृतम्

**समयः 2.5 hr.** **पूर्णाङ्कः 60**

**सामान्य-निर्देशाः**

सर्वे प्रश्नाः अनिवार्याः।

उत्तराणि संस्कृतेनैव लेखनीयानि।

प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

प्रश्नसंख्या अवश्यमेव लेखनीया।

प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

- खण्ड 'क' अपठित-अवबोधनम् 8 अंकाः
- खण्ड 'ख' रचनात्मक–कार्यम् 12 अंकाः
- खण्ड 'ग' अनुप्रयुक्त-व्याकरणम् 18 अंकाः
- खण्ड 'घ' पठित-अवबोधनम् 22 अंकाः

**खण्ड-क**

**अपठित-अवबोधनम्** **8 अंकाः**

**प्र०1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

विद्यालये प्रतिदिनं विद्यार्थी उत्साहेन आगच्छन्ति। ते सर्वे स्वच्छवस्त्रधारिणः भवन्ति। विद्यालयस्य उद्याने सुन्दराणि पुष्पाणि विकसितानि सन्ति। अत्र अध्यापकाः विद्यार्थिभ्यः नूतनं ज्ञानं प्रददति। विद्यालयस्य जीवनं सर्वेषां मनसि आनन्दं जनयति।

**अ) एकपदेन उत्तरत - (केवलं प्रश्नत्रयम्)** **3×1=3**

(क) विद्यार्थीः कुत्र प्रतिदिनम् आगच्छन्ति?

(ख) उद्याने कानि विकसितानि सन्ति?

(ग) के विद्यार्थिभ्यः ज्ञानं प्रददति?

**आ) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)** **1x2=2**

(क) विद्यालयस्य जीवनं किं जनयति?

(ख) सुन्दराणि पुष्पाणि कुत्र विकसितानि सन्ति?

**स) यथानिर्देशम् उत्तरत- (केवल प्रश्नद्वयम्)** **2×1=2**

(क) ' पुष्पाणि' अस्य पदस्य एकवचनरूपम् अस्ति -

(अ) पुष्म्  (ब) पुष्पम्  (स) पुष्पः  (द) पुष्पा

(ख) 'विकसन्ति' इति पदं कस्मिन् लकारे अस्ति?

(अ) लृट्  (ब) लट्  (स) लोट्  (द) लङ्

(ग) ' विद्यालये प्रतिदिनं विद्यार्थी उत्साहेन आगच्छन्ति' अत्र किं क्रियापदम् अस्ति?

(अ) 'विद्यालये  (ब) प्रतिदिनं  (स) आगच्छन्ति  (द) उत्साहेन

**(द) अस्य अनुच्छेदस्य कृते उपयुक्त शीर्षकं संस्कृतेन लिखत। 1**

**खण्ड-ख**

**रचनात्मक कार्यम्  12 अंका**

**प्र०2. अध:प्रदत्तानि चित्राणि दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया चत्वारि वाक्यानि रचयत - (4x2=8)**









**मञ्जूषा**

| |
|---|
| कन्दुकम्, बालकाः, क्षेत्रं, , चटकाः, चलन्ति, छात्रः, पिबति, क्रीडन्ति, सन्ति अस्ति |

अथवा

**मञ्जूषात: पदं चित्वा वाक्यानि पूरयत -**

**मञ्जूषा**

| भ्रमतः, नृत्यन्ति, वृक्षाः, कोकिलः |
|---|

१. गजौ………………………….. ।
२. ………………………….. सन्ति।
३. मयूराः…………………………..।
४. ………………………….. कूजति।

**प्र० 3. उचितेन सर्वनामपदेन संयोज्य वाक्यानि रचयत** **(4x1=4)**

| **क–स्तम्भः** | **ख–स्तम्भः** |
|---|---|
| (क) सः | (i) खादसि |
| (ख) ते | (ii) चलति |
| (ग) त्वं | (iii) गच्छन्ति |
| (घ) आवां | (iv) धावावः |

**खण्ड-ग**

**अनुप्रयुक्त-व्याकरणम्** **18 अंकाः**

**प्र.4 अधोलिखितानाम् उदाहरणानाम् अनुसारं रिक्तस्थानानि पूरयत–** **3x1=3**

| | | |
|---|---|---|
| क) वैद्या | ………(i)………… | ………(ii )………… |
| ………(iii)………… | चक्रे | चक्राणि |

**प्र. 5 अधोलिखितानाम् उदाहरणानाम् अनुसारं रिक्तस्थानानि पूरयत–** **3x1=3**

| | | |
|---|---|---|
| अस्ति | ………(i)………… | सन्ति |
| ………(ii) ………… | ………(iii)………… | स्मः |

**प्र.6 सः, ते, तत्, ताः** इत्येभ्यः शब्देभ्यः उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत - **4x1=4**

| **संज्ञाशब्दाः** | **सर्वनामशब्दाः** |
|---|---|
| यथा- **लता** अस्ति | सा अस्ति। |
| (1) पिपीलिके चलतः। | …………………. चलतः। |

(ii) चटकाः कूजन्ति।  ...................... कूजन्ति।

(iii) दीपकः वदति।  ...................... वदति।

(i) फलं पतति  ...................... पततिे।

**प्र. 7 अङ्कानां कृते मञ्जूषातः चित्वा उचितं पदं पूरयत–** **4x1=4**

(i) जन्मोत्सवे (२५) ........................... अतिथयः आगतवन्तः।

(ii) प्रतियोगितायां (३३) ...................... छात्राः भागं गृहीतवन्तः।

(iii) बसयाने (४९)..................... जनाः आसन्।

(iv) उद्याने (६८) ..................... वृक्षाः सन्ति।

**प्र.8 उदाहरणानुगुणं समयम् अक्षरैः संख्याभिर्वा लिखत –** **4x1=4**

| | | |
|---|---|---|
| ०९.०० ........................... | **अथवा** | सप्तवादनम् |
| ०३.४५ ........................... | | सार्ध–पञ्चवादनम् |
| ०६.३० ........................... | | पादोन–द्वादशवादनम् |
| ०४. १५ ........................... | | सपाद–एकवादनम् |

**खण्ड-घ**

**पठित-अवबोधनम्** **22 अंका:**

**प्र.9 अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत-** **5**

एकदा तेन मार्गेण कश्चित् धनिकः आगच्छति। सः भिक्षुकः मनसि एव चिन्तयति -"अहो मम भाग्यम्। अद्य अहं प्रभूतं धनं प्राप्नोमि" इति।

भिक्षुकः धनिकं वदति - "आर्य! अहम् अतीव दरिद्रः अस्मि, कृपया दानं करोतु" इति।

धनिकः तं पृष्टवान् - "त्वं किम् इच्छसि ?"

"आर्य! अहं प्रभूतं धनम् इच्छामि"

इति सः सविनयम् उक्तवान् ।

तदा धनिकः वदति "अहं तुभ्यं सहस्रं रूप्यकाणि यच्छामि।

**अ) एकपदेन उत्तरत– (केवलं प्रश्नमेकम्)** **1x1 = 1**

i. एकदा मार्गेण कः आगच्छति स्म?

ii. भिक्षुकः कं वदति?

**ब)पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)** **1x2 = 2**

i. भिक्षुकः मनसि किं चिन्तयति?
ii. धनिकः भिक्षुकं किं वदति?

**स) यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्)** **2x1 = 2**

i) 'प्रभूतं धनम्' अनयोः पदयोः किं विशेष्यपदम् अस्ति?

क) प्रभूतं ख) धनम् ग) उभे पदे घ) न किमपि

**ii)** 'निर्धनः' पदस्य कृते किं पर्यायपदं गद्यांशे प्रयुक्तम्?

क) धनिकः ख) निर्धनम् ग) भिक्षुकः घ) धनी

**iii)** ' अहम् अतीव दरिद्रः अस्मि, ' अत्र अहम् इति सर्वनामपदं कस्मै प्रयुक्तम्?

क) भिक्षुकाय ख) निर्धनाय ग) धनिकाय घ) छात्राय

**प्र.10 अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत-** **5**

छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ॥

**अ) एकपदेन उत्तरत– (केवलं प्रश्नमेकम्)** **1x1 = 1**

i. वृक्षाः अन्यस्य किं कुर्वन्ति?
ii. वृक्षाः स्वयं कुत्र तिष्ठन्ति ?

**ब) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)** **1x2 = 2**

i. वृक्षाणां परार्थाय किम् सन्ति?
ii. वृक्षसदृशाः के सन्ति?

**स) यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्)** **2x1 = 2**

i. 'वृक्षाः' अत्र का विभक्तिः अस्ति?

क) प्रथमा ख) पञ्चमी ग) षष्ठी घ) द्वितीया

ii. 'सज्जनाः' अस्य किं पर्यायपदं पद्ये प्रयुक्तम्?

क) वृक्षाः ख) सत्पुरुषाः ग) सेवकाः घ) आतपः

iii. ‘स्वार्थाय’ पदस्य किं विलोमपदं पद्यांशे प्रयुक्तम्?

क) परार्थाय ख) विकासाय ग) शुभचिन्तकाय घ) वृक्षाः

**प्र.11 अधोलिखितं संवादं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत– 5**

माधवनामकः एकः बालकः आसीत्। सः स्वप्ने स्वशरीरस्य अङ्गानि दृष्टवान् । तानि परस्परं चर्चा कुर्वन्ति स्म।
पादः वदति - अहं श्रेष्ठः । मम कारणेन माधवः चलति ।
हस्तः अनुक्षणं वदति - अरे अरे। मम कारणेन माधवः लिखति, गृहकार्यं करोति, वस्तूनि आनयति च। अतः अहम् एव श्रेष्ठः । मां विना माधवः किमपि द्रष्टुं शक्नोति किम् ? इति नयनं वदति।
कर्णः स्मितं कृत्वा कथयति – माधवः यदा मार्गे गच्छति तदा पृष्ठतः यानानां ध्वनिं यदि न श्रृणोति सावधानः च न भवति, तर्हि दुर्घटना भवेत् । माधव, मम कारणेन एव शिक्षकस्य उपदेशं श्रुत्वा ज्ञानं वर्धयति, सङ्गीतं च श्रुत्वा आनन्दं च अनुभवति।

**अ) एकपदेन उत्तरत– (केवलं प्रश्नमेकम्) 1x1 = 1**

i. ) बालकस्य नाम किम् आसीत्?
ii.) किं श्रुत्वा आनन्दं च अनुभवति?

**ब) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) 1x2 = 2**

i.) पादः किं वदति?
ii.) हस्तः अनुक्षणं किं वदति?

**स) यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्) 2x1 = 2**

i.) ‘पादः वदति? अत्र पादः इत्यत्र का विभक्तिः?

क) द्वितीया ख) प्रथमा ग) सप्तमी घ) पञ्चमी

ii.) ‘अहं श्रेष्ठः' अत्र अहम् इति सर्वनामपदेन कस्य निर्देशः?

क) पादस्य ख) हस्तस्य ग)कर्णस्य घ) माधवस्य

iii.) ‘गच्छति’ पदस्य किं पर्यायपदम् गद्यांशे प्रयुक्तम् अस्ति?

क) चलति ख) करोति ग) शक्नोति घ) आनयति

**12. मञ्जूषातः समुचितानि पदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत– 3x1= 3**

**12.** वर्णसंयोजनेन रिक्तस्थानानि पूरयत (केवलं प्रश्नत्रयम्)

**(i)** ग्+अ+ण्+ए+श्+अः= .......................................................

**(ii)** व्+इ+ष्+ण्+उः= .......................................................

**(iii)** च्+इ+न्+त्+अ+क्+आः= .......................................................

**अथवा**

वर्णविच्छेदं कुरुत -

**(i)** शिक्षकः .......................................................

**(ii)** वन्दनम् .......................................................

**(iii)** कवोष्णम् .......................................................

**13 द्वितीयाविभक्तेः वाक्यानि रचयन्तु।** **4x1=4**

यथा– बालकः ……………….देवं……………….नमति।(देव)

i.) बालिकाः ………………………………… गच्छन्ति। (विद्यालय)

ii.) पक्षिणः ……………………………….. खादन्ति। (फल)

iii.) शिक्षकः ………………………………… पाढयति। (पाठ)

iv.) नर्तकी ………………………………… धरति। (मुद्रा)